# आनन्दामृताकर्षिणि

## रागम्ः अमृतवर्षिणि    ताळम्ः आदि

*श्री मुत्तुस्वामि दीक्षित विरचिता*

पल्लवि

आनन्दामृताकर्षिणि अमृतवर्षिणि
हरादिपूजिते शिवे भवानि

समष्टिचरणम्

श्रीनन्दनादि संरक्षिणि श्रीगुरुगुहजननि चिद्रूपिणि

मध्यमकल सहित्यम्

सानन्दहृदयनिलये सदये सद्यस्सुवृष्टिहेतवे त्वाम्
सन्ततं चिन्तये अमृतेश्वरि सलिलं वर्षय वर्षय वर्षय

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇